# साङ्ख्यकोशः

## साङ्ख्यकारिकाविवृतिः, साङ्ख्यसूत्रविवृतिश्च

**अनुवादकः**
डा. कृष्ण. ए. नागसम्पिगे

**पूर्णप्रज्ञसंशोधनमन्दिरम्**
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु -२८

# साङ्ख्यकारिकाप्रतिपदार्थः सारश्च

**दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ**
**दृष्टे सा अपार्था चेत् न एकान्तात्यन्ततोऽभावात् ।।१।।**

**प्रतिपदार्थः –** दुःखत्रयाभिघातात्=आध्यात्मिक-आधिभौतिक-आधिदैविकरूपात् दुःखत्रयात् अभिनुन्नस्य पुरुषस्य, तदपघातके=तद्विनाशके, हेतौ=कारणकलापेषु, जिज्ञासा=विविदिषा भवति, दृष्टे=लोकप्रसिद्धे सुकरे भेषजादिना दुःखोच्छेदे सुलभे सति, सा=दुर्लभे प्रकृतिपुरुषविवेके जिज्ञासा, अपार्था=व्यर्था अन्यथासिद्धा वा इति चेत्, न । दृष्टेन हेतुना, एकान्तः=अवश्यंभाव्यस्य दुःखनिवृत्तेः, अत्यन्तः=पुनर्दुःखानुत्पादस्य च, अभावात्=असम्भवात् ।

**तात्पर्यम्** – लोकेऽस्मिन् जनाः आध्यात्मिक-आधिभौतिक-आधिदैविकरूपैः दुःखत्रयैः अभिनुन्नाः सन्तः बहुदुःखं अनुभवन्ति । तादृशदुःखत्रयोच्छेदके प्रकृतिपुरुषविवेकरूपे हेतौ पुरुषस्य जिज्ञासा भवति । ननु 'दृष्टैरुपायैः एव दुःखत्रयाणां उच्छेदो भवति' इति सा प्रकृतिपुरुषविवेकरूपा जिज्ञासा व्यर्था इति चेत्, न । दृष्टेन हेतुना अवश्यंभाव्यस्य दुःखनिवृत्तेः पुनर्दुखानुत्पादस्य च असम्भवात् ।

विशेषविचारः - त्रिविधदुःखनिरूपणम् —

**आध्यात्मिकम्** – आन्तरोपायसाध्यत्वात् आध्यात्मिकम् इति अस्य नाम । तच्च दुःखं द्विविधम् – शारीरं, मानसञ्च इति । तत्र शारीरं वात-पित्थ-श्लेष्माणां वैषम्यनिमित्तम् । मानसञ्च काम-क्रोध-लोभ-मोह-मद-मात्सर्यरूपं अरिषड्वर्गनिमित्तम् । अत्र शरीरदुःखस्य वैद्यदत्तौषधरसायनादिसेवनात् निवृत्तिर्भवति । मानसस्य च दुःखस्य चित्तनिरोधात् योगाभ्यासाच्च अपाकरणं भवति ।

**आधिभौतिकम्** – मनुष्य-पशु-पक्षि-सरीसृपादिसकाशात् जायमानं दुःखं आधिभौतिकं इत्याचक्षते । तस्य अभिघातः नीतिशास्त्राभ्यासगिरिदुर्गाद्याश्रयणेन दृष्टः ।

**आधिदैविकम्** – यक्ष-राक्षस-विनायक, राहु-शनि, इत्यादिग्रहाणां देवानां च सकाशात् जायमानं दुःखं आधिदैविकम् । तस्य च मणिमन्त्रौषधिरूपात् दृष्टोपायादेव उच्छेदः भविष्यति ।

अत्र कारिकायां 'एकान्तत', 'अत्यन्तत' इति पदद्वयं वर्तते । दुःखनिवृत्तेः विशेषणद्वयं एतत् इति ज्ञातव्यम् । एवञ्च लौकिकोपायेषु अनुष्ठितेष्वपि आत्यन्तिकदुःखनिवृत्तिः न भवति । सा च केवलं प्रकृतिपुरुषविवेकज्ञानसाध्या इति कारिकाशयः ।

ननु वेदोक्तैरुपायैरेव अभीप्सितः दुःखात्यन्तनिवृत्तिः भवति । अतः 'अग्नीषोमीयं पशुमालभेत' (तै.सं.६.१.११.) इत्यादिवेदोक्तान् उपायानेव दुःखनिवृत्तिसाधनत्वेन अनुतिष्ठन्तु इति चेत्, ते उपायाः आत्यन्तिकदुःखनिवृत्तौ असमर्था इति निरूपणार्थं इयं कारिका प्रवृत्ता ।। १ ।।

**दृष्टवदानुश्रविकः स ह्यविशुद्धक्षयातिशययुक्तः ।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ।। २ ।।**

**प्रतिपदार्थः** – आनुश्रविकः=यागादिक्रियाकलापरूपः वैदिक उपायः, दृष्टवत्=औषधादिलौकिकोपायवत्, हि=यस्मात्, सः=वैदिक उपायः, पशुहिंसादिसम्बन्धात् अविशुद्धयुक्तः=पूर्णशुद्धिहीनः, क्षयातिशययुक्तः=क्षयिष्णुफलकः,

# साङ्ख्यदर्शने प्रकाशिताः ग्रन्थाः

## महीश्वरप्राच्यविद्यालयशसंशोधनालये उपलभ्यमानाः मुद्रितसाङ्ख्यदर्शनग्रन्थाः

| क्रम.सं | ग्रन्थनाम | कर्तृनाम | लिपिः | मुद्रणस्थलम्/प्रकाशकश्च (ग्रन्थसङ्ख्या) |
|---|---|---|---|---|
| १-२ | कापिलसूत्रवृत्तिः | माधवः | देवनागरी | कल्कत्त (B 960, B1879) |
| ३ | कापिलसूत्रटीका(साङ्ख्यदिवाकरः) | | ,, | बोम्बे (B 1593) |
| ४ | जयमङ्गला (साङ्ख्यसप्ततिव्याख्या) | शङ्करः | ,, | काशी (B 4293) |
| ५-६ | साङ्ख्यकारिका(गौडपादभाष्ययुता) | ईश्वरकृष्णः | ,, | ,, (B360, B3888) |
| ७. | ,, ,, | ,, | ,, | कल्कत्ता (B933) |
| ८. | ,, (युक्तिदीपिकायुता) | ,, | ,, | ,, (A2362) |
| ९-१० | ,, (माठरवृत्तियुता) | ,, | ,, | काशी (B4173, B4737) |
| ११ | ,, (साङ्ख्यतत्वकौमुदीसहिता) | ,, | ,, | ,, (B 4781) |
| १२ | ,, ,, | ,, | ,, | कल्कत्ता (B 237) |
| १३-१४ | साङ्ख्यकारिका (भारतीतीर्थकृतव्याख्यायुता) | ,, | ,, | काशी (B1722, B 1991) |
| १५ | साङ्ख्यकारिका (वंशधरकृतव्याख्यायुता) | ,, | ,, | ,, (B 4175) |
| १६ | साङ्ख्यकारिकाविवृतिः (आङ्ग्लेयानुवादयुता). | | | कल्कत्ता (B 350) |
| १७-१८ | साङ्ख्यतत्त्वप्रदीपः (आङ्ग्लेयानुवादयुतः). | | देवनागरी | काशी (C 100-101) |
| १९ | साङ्ख्यतत्त्वालोकः | हरिहरानन्दः | ,, | ,, (B 4732) |
| २० | साङ्ख्यदर्शनम् (अनिरुद्धवृत्तियुतम्) | कपिलर्षिः | ,, | कल्कत्ता (B 932) |
| २१ | साङ्ख्यदर्शनम्(विज्ञानभिक्षुकृतव्याख्यायुतम्) | कपिलर्षिः | देवनागरी | कल्कत्ता (B 1931) |
| २२ | ,, (विज्ञानभिक्षुकृतव्याख्यायुतम्). | ,, | ,, | काशी (B 2722) |
| २३ | ,, (भाषाटीकायुतम् ) | ,, | ,, | बोम्बे (B 3469) |
| २४-२५ | साङ्ख्यप्रवचनभाष्यम् | विज्ञानभिक्षुः | ,, | कल्कत्ता (B 512, B 238) |
| २६ | ,, | ,, | ,, | लण्डन् (A 1305) |
| २७ | साङ्ख्यप्रवचनाख्यायिका | | ,, | काशी (B 364) |